## (573) "उ छृदिर् दीप्तिदेवनयोः"

(VII-रुधादिः-1445. अक. सेट्. उभ.)

'छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे ।
छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्नमि ॥' (श्लो. 115) इति देवः ।

'देवनम् = क्रीडाविजिगीषादि । दीप्तिवमनयोः इत्येके ।' इति धातुकाव्यव्याख्याने (3. 2.) ।

[1]छर्दकः-र्दिका, छर्दकः-र्दिका, [2]चिच्छर्दिषकः-षिका-चिच्छृत्सकः-त्सिका, [[3]चरीच्छृदकः-दिका ;

छर्दिता-त्री, छर्दयिता-त्री, चिच्छर्दिषिता-चिच्छृत्सिता-त्री, चरीच्छृदिता-त्री ;

[4]छृन्दन्-ती, छर्दयन्-न्ती, चिच्छर्दिषन्-चिच्छृत्सन्-न्ती ; —

[5]छर्दिष्यन्-छर्त्स्यन्-न्ती-ती, छर्दयिष्यन्-न्ती-ती, चिच्छर्दिषिष्यन्- [चिच्छृत्सिष्यन्-न्ती-ती ;

छृन्दानः, छर्दयमानः, चिच्छर्दिषमाणः-चिच्छृत्समानः, चरीच्छृद्यमानः ;

छर्दिष्यमाणः-छर्त्स्यमानः, छर्दयिष्यमाणः, चिच्छर्दिषिष्यमाणः-चिच्छृत्सि- [ष्यमाणः, चरीच्छृदिष्यमाणः ;

सुच्छृत्-सुच्छृद्-सुच्छृदौ-सुच्छृदः ; — —

---

1. 'पुगन्तलघूपधस्य च' (7-3-86) इत्युपधाया गुणः । एवं णिजन्तेऽपि ज्ञेयम् ।
2. 'सेऽसिचि कृतचृतच्छृदतृदनृतः' (7-2-57) इति सकारादेरार्धधातुकस्येड्विकल्पः । इट्पक्षे, लघूपधगुणो भवति । इडभावपक्षे, 'हलन्ताच्च' (1-2-10) इति सनः कित्वाल्लघूपधगुणाभावः । धातुदकारस्य 'खरि च' (8-4-55) इति चर्त्वम् । एवं सन्नन्ते सर्वत्र रूपद्वयस्योपपत्तिर्ज्ञेया ।
3. 'रीगृदुपधस्य च' (7-4-90) इत्यभ्यासस्य रीगागमः । 'दीर्घात्' (6-1-75) इति तुक् । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. 'रुधादिभ्यः—' (3-1-78) इति श्नम् । 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपः । एवं छृन्दानः इत्यत्रापि प्रक्रिया ज्ञेया ।
5. 'सेऽसिचि कृतचृतच्छृद—' (7-2-57) इति स्यप्रत्ययस्येड्विकल्पः । लघूपधगुणः । एवं शानजन्तेऽपि ज्ञेयम् ।